इति साहित्यदर्पणः ॥ "रिक्तं त्रिविधं मुनयो नियतमनियतं योगजञ्च" । इति ज्योतिषं ॥

अनियमः, पुं, (न नियमः, नञ्समासः ।) नियमाभावः । अनिश्चयः । अनिर्द्धारः । यथा,—
"गुरुषष्ठञ्च पादानां शेषेष्वनियमो मतः" ।
इति छन्दोमञ्जरी ॥ तद्विशिष्टे त्रि ॥

अनिराकृतः, त्रि, (निर् + आ + कृ + क्त कर्म्मणि क्तः, ततो नञ्समासः ।) अनिवारितः । यथा,—
"अनिराकृततापसम्पदं
फलहीनां सुमनोभिरुज्झितां" ।
इति माघः ॥

अनिरुद्धं, क्ली, (नि + रुध् + भावे क्तः, नास्ति निरुद्धं यस्मात् तत् ।) सन्दानं । पश्वादिबन्धनरज्जुः । इति त्रिकाण्डशेषः ॥

अनिरुद्धः, पुं, (न निरुध्यतेऽसौ नि + रुध् + कर्म्मणि क्तः, ततो नञ्समासः ।) कामदेवपुत्त्रः । तत्पर्य्यायः । उषापतिः २ ब्रह्मसूः ३ विश्वकेतुः ४ । इत्यमरः ॥ स तु भगवतश्चतुर्व्यूहान्तर्गतादिव्यूहः । तस्मात् सृष्टिर्भवति यथा,—
"तमसो ब्रह्मसम्भूतं तमोमूलामृतात्मकं ।
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमाश्रितं ॥
सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधानं प्रचक्षते ।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम ॥
विद्यासहायवान् देवो विश्वक्सेनो हरिः प्रभुः ।
अप्स्वेव शयनञ्चक्रे निद्रायोगमुपागतः ॥
जगतश्चिन्तयन् सृष्टिं महानात्मगुणः स्मृतः" ।
इति महाभारते मोक्षधर्म्मः ॥

अनिरुद्धः, त्रि, (नि + रुध् + कर्म्मणि क्तः, ततो नञ्समासः ।) रोधशून्यः । अप्रतिबद्धः । चरः । इति विश्वः ॥

अनिरुद्धपथं, क्ली, (अनिरुद्धः प्रतिबन्धरहितः पन्था यत्र सः ।) आकाशं । इति शब्दचन्द्रिका ॥ अरुद्धवर्त्म ॥

अनिरुद्धभाविनी, स्त्री, (अनिरुद्धस्य कामपुत्त्रस्य भाविनी पत्नी, षष्ठीतत् ।) उषा । सा च कामपुत्त्रपत्नी । बाणराजकन्या । इति शब्दरत्नावली ॥

अनिर्णयः, पुं, (निर् + नी + भावे अच्, ततो नञ्समासः ।) अनिर्द्धारः । अनिश्चयः । निर्पूर्व्वकनीञ्धातोरलि नञ्समासः ॥

अनिर्धारितः, त्रि, (निर् + धृ + णिच् कर्म्मणि क्तः, ततो नञ्समासः ।) अकृतनिर्धारणः । अनिश्चितः । यथा । "अनिर्धारितैकत्वानेकत्वविशेषस्य पूर्व्वरूपमात्रस्य व्यक्तस्य व्याधिलिङ्गत्वं" । इति रोगपूर्व्वरूपलक्षणे रक्षितः ॥

अनिर्म्मलः, त्रि, (न निर्म्मलः परिष्कृतः नञ्समासः ।) मलिनः । आविलः । अपरिष्कृतः । निर्म्मलाभावे क्ली ॥

अनिर्म्माल्या, स्त्री, (निर् + मल् + ण्यत् स्त्रियां टाप्, ततो नञ्समासः ।) एक्कानामकौषधिः । इति शब्दरत्नावली ॥

अनिर्व्वचनीयः, त्रि, (निर् + वच् + कर्म्मणि अनीयः, ततो नञ्समासः ।) निर्व्वचनायोग्यः । अनिर्व्वाच्यः । वाक्यागम्यः । यथा, "सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चिदिति वदन्ति" । इत्यज्ञानलक्षणे वेदान्तसारः ॥

अनिर्व्वाहः, पुं, (निर् + वह् + भावे घञ्, ततो नञ्समासः ।) निर्व्वाहाभावः । अनिष्पत्तिः । असङ्गतिः । यथा । मुख्यार्थबाधे तद्योगे इति कारिकायां मुख्यार्थस्यान्वयबाधोऽपि तात्पर्य्यविषयस्यान्वयस्य मुख्यार्थतावच्छेदकरूपेणानिर्व्वाह एव । इति काव्यप्रकाशटीकायां महेश्वरः ॥

अनिर्व्विण्णः, त्रि, (निर् + विद् + क्तः, ततो नञ्समासः ।) निर्व्वेदशून्यः । वत्रे निर्व्विण्णमानस इत्यत्र निर्व्विण्णं विरक्तं इति देवीमाहात्म्यटीका तद्भिन्नः अविरक्तः विषयासक्त इति यावत् ॥ निर्व्विण्णोतिममलेन इत्यत्र निर्व्विण्णो दुःखितः इति देवीमाहात्म्यटीका तद्भिन्नः अदुःखितः ॥ बहुव्रीहौ तु अतिदुःखितः ॥

अनिर्वृतिः, स्त्री, (नि निर्वृतिः, स्वाच्छन्द्यं, नञ्समासः ।) निर्वृत्यभावः । दरिद्रता । यथा ।
"अनिर्वृतिनिशाचरी मम गृहान्तरालं गता" । इत्युद्भटः ॥

अनिलः, पुं, (अनिति जीवत्यनेन अन् + इलच् ।) वायुः । इत्यमरः ॥ वसुविशेषः । इति मेदिनी ॥ (शरीरस्थप्राणादिवायुः । वातरोगः । स्वातिनक्षत्रं ।)

अनिलघ्नकः, पुं, (अनिलं वातरोगं हन्ति इति, अनिल + हन् + टक् + स्वार्थे कन् ।) विभीतकवृक्षः । इति राजनिर्घण्टः ॥

अनिलसखः, पुं, (अनिलस्य सखा इति राजाहःसखिभ्यष्टच् इति समासान्तः टच् ।) अग्निः । इति हेमचन्द्रः ॥

अनिलान्तकः, पुं, (अनिलस्य अन्तकः ।) इङ्गुदावृक्षः । इति राजनिर्घण्टः ॥

अनिलामयः, पुं, (अनिलः वात एव आमयः रोगः, रूपकसमासः ।) वातरोगः । इति राजनिर्घण्टः ॥

अनिर्लोचितः, त्रि, (न निर्लोचित इति नञ्समासः, निर् + लोचि + क्त ।) अनालोचितः । अविवेचितः । यथा,—
"अनिर्लोचितकार्य्यस्य वाग्जालं वाग्मिनो वृथा" । इति माघः ॥

अनिशं, क्ली, (निशा रात्रिः, उपचारात् व्यापाररहित्यम्, नास्ति निशा यस्मिन् तत्, क्रियाविशेषणत्वे अस्य क्लीवत्वं, द्रव्यविशेषणत्वे तु त्रिलिङ्गत्वं ।) अनवरतं । सततं । इत्यमरः ॥ ("निजमैक्षि मन्दमनिशं निशितैः कृशितं शरीरमशरीरशरैः" । इति माघे ।)

अनिश्चितः, त्रि, (निर् + चि + कर्म्मणि क्तः, न निश्चित इति नञ्समासः ।) निश्चयरहितः । अनिरूपितः । अनिर्णीतः । यथा, "कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः" । इति श्रीभागवतं ॥

अनिष्टः, त्रि, (इष् + कर्म्मणि क्तः, न इष्ट इति नञ्समासः ।) अनभिलषितः । अवाञ्छितः । यथा, "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्" । इति साहित्यदर्पणं ॥

अनिष्टा, स्त्री, (इष् + क्त, + टाप्, नञ्समासः) नागबला । इति राजनिर्घण्टः ॥

अनिष्णातः, त्रि, (नि + स्ना + कर्त्तरि क्तः, न निष्णात इति नञ्समासः ।) अकुशलः । अप्रवीणः । अनभिज्ञः । अकृती । निपूर्व्वात् स्नाल शोधने इत्यस्मात् कर्त्तरि क्ते नञ्समासः ॥

अनिष्पन्नः, त्रि, (पाणिनिमते तु नि + स्ना + कर्त्तरि क्तः, निनदीभ्यां स्नातेः कौशले इति षत्वं, ततो नञ्समासः ।) निष्पत्तिरहितः । असमाप्तः । असम्पूर्णः । निर्पूर्व्वकपदधातोः कर्म्मणि क्ते निष्पन्नः पश्चान्नञ्समासः ॥

अनिक्षुः, पुं, (इक्षुसदृशः नञ्समासः, नञत्र सादृश्ये ।
"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥
इति कारिकायां ।)
इक्षुविशेषः । आनाखु । खाकड़ा इति ख्यातः । तत्पर्य्यायः । इक्षुतुल्या २ इक्षुरालिका २ इक्षालिका ४ । इति रत्नमाला ॥

अनीकः, पुं, क्ली, (नास्ति नीः स्वर्गप्रापको यस्मात् । कप्, अर्द्धर्चादित्वात् पुंस्त्वं क्लीवत्वञ्च ।) युद्धं, सैन्यं । इति मेदिनी ॥

अनीकस्थः, पुं, (अनीके युद्धे तिष्ठति, अनीक + स्था + कर्त्तरि कः, उपपदसमासः ।) रणगतः । संग्रामस्थः । हस्तिशिक्षाविचक्षणः । राजरक्षकः । चिह्नं । वीरमर्द्दलकः । इति मेदिनी ॥ जयढाक इति भाषा ।

अनीकिनी, स्त्री, (अनीको रणोऽस्ति प्रयोजनत्वेन अस्या इति, अनीक + इनि + स्त्रियाम् ।) सैन्यसंख्याविशेषः । तद्यथा । ६५६१ अश्वाः । २१८७ हस्तिनः । १०९३५ पदातयः । २१८७ रथाः । समुदायेन सप्तत्यधिकाष्टशताधिकसहस्राधिकायुतद्वयं । २१८७० अक्षौहिणीदशमांशेयं । इत्यमरभरतौ ॥

अनीचदर्शी, [न्] पुं, (नीचात् नीचकार्य्यात् अन्यत्, नञ्समासः, तदेव वियतेऽस्य अनीच + इन्, तादृशसत्कर्म्मशालिजनवत् पश्यति अनीची + दृश + णिनि, उपपदसमासः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥

अनीतिः, स्त्री, (न नीतिः, नञ्समासः ।) दुर्नीतिः । अन्यायः । अत्याचारः । यथा,—
"विषयो व्यतिपाताश्च ये चान्येऽनीतिसम्भवाः" । इति वामनपुराणं ॥

अनीशः, पुं, (नास्ति ईशः नियन्ता यस्य सः ।) विष्णुः । इति तस्य सहस्रनाममध्ये पठितः ॥ ईश्वरभिन्ने त्रि । यथा,—
"अनीशो वा कुर्य्याद्भुवनजनने कः परिकरं" । इति पुष्पदन्तः ॥

अनु, अ, उपसर्गविशेषः । पश्चात् । सादृश्यं । लक्षणं । वीप्सा । इत्थम्भावः । भागः ।